श्री परशुरामाष्टाविंशतिनाम स्तोत्रं

श्री परशुरामाष्टाविंशतिनाम स्तोत्रं

ऋषिरुवाच |
यमाहुर्वासुदेवांशं हैहयानां कुलांतकं |
त्रिःसप्तकृत्वो य इमां चक्रे निःक्षत्रियां महीं || 1 ||

दुष्टं क्षत्रं भुवो भारमब्रह्मण्यमनीनशत् |
तस्य नामानि पुण्यानि वक्ष्मि ते पुरुषर्षभ || 2 ||

भूभारहरणार्थाय मायामानुषविग्रहः |
जनार्दनांशसंभूतः स्थित्युत्पत्त्यप्ययेश्वरः || 3 ||

भार्गवो जामदग्न्यश्च पित्राज्ञापरिपालकः |
मातृप्राणप्रदो धीमान् क्षत्रियांतकरः प्रभुः || 4 ||

रामः परशुहस्तश्च कार्तवीर्यमदापहः |
रेणुकादुःखशोकघ्नो विशोकः शोकनाशनः || 5 ||

नवीननीरदश्यामो रक्तोत्पलविलोचनः |
घोरो दंडधरो धीरो ब्रह्मण्यो ब्राह्मणप्रियः || 6 ||

तपोधनो महेंद्रादौ न्यस्तदंडः प्रशांतधीः |
उपगीयमानचरितः सिद्धगंधर्वचारणैः || 7 ||

जन्ममृत्युजराव्याधिदुःखशोकभयातिगः |
इत्यष्टाविंशतिर्नाम्नामुक्ता स्तोत्रात्मिका शुभा || 8 ||

अनया प्रीयतां देवो जामदग्न्यो महेश्वरः |
नेदं स्तोत्रमशांताय नादांतायातपस्विने || 9 ||

नावेदविदुषे वाच्यमशिष्याय खलाय च |
नासूयकायानृजवे न चानिर्दिष्टकारिणे || 10 ||

इदं प्रियाय पुत्राय शिष्यायानुगताय च |
रहस्यधर्मो वक्तव्यो नान्यस्मै तु कदाचन || 11 ||

इति श्री परशुराम अष्टाविंशतिनाम स्तोत्रं |